वहम् । विपाके मधुरश्चापि रक्तपित्तविनाशनम् । हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवकवक-बलाकापुण्डरीकप्लवशरारीमुखनन्दीमुखमद्गुतत्क्रोशकाचाक्षमल्लिकाक्षशुक्लाक्षपुष्करशायिकाकोनालकाम्बुकुक्कुटिकामेघरावश्वेतचरणप्रभृतयः प्लवाः सङ्घानुचारिणः । रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः । सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः । गुरुष्णमधुरः स्निग्धः स्वरवर्ण्णबलप्रदः । वृंहणः शुक्रलस्तेषां हंसो मारुतनाशनः ।

शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः । कूर्म्म-कुम्भीरकर्कटककृष्णकर्कटकशिशुमारप्रभृतयः पादिनः । शङ्खकूर्म्मादयः स्वादुरसपाका मरुन्नुदः । शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः । कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः । शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा । मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः रोहितपाठीनपाटलाराजीववर्म्मिगोमत्स्यकृष्णमत्स्यवागुञ्जारमुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः । नादेया मधुरा मत्स्या गुरवोमारुतापहाः । रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः । कषायानुरसस्तेषां शष्पशैवालभोजनः । रोहितो मारुतहरो नात्यर्थं पित्तकोपनः । पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः । दूषयेद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ । मुरली वृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा । सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः । महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः । तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः । सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः । उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्द्धनाः । बलावहा विशेषेण मांसाशित्वात् समुद्रजाः । समुद्रजेभ्योनादेया वृंहणत्वाद्गुणोत्तराः । तेषामप्यनिलघ्नत्वाच्चौण्ट्यकौप्यौ गुणोत्तरौ । स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाप्या गुणोत्तराः । नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः । सरस्तडागजानान्तु विशेषेण शिरो लघु । अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः । किञ्चिन्मुक्त्वा शिरोदेशमत्यर्थं गुरवस्तु ते । अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः । उरोविचरणात्तेषां पूर्वमङ्गं लघु स्मृतम् । इत्यानूपो महाभिस्यन्दिमांसवर्गो व्याख्यातः" "मनुष्यतत्स्थयोर्वुञ्" पा० मनुष्ये तत्स्थे हसितादौ वाच्ये तु वुञ् । आनूपक इत्येव

**आनृत** त्रि० अनृतं शीलमस्य छत्रा० अण् । सततमिथ्यानुशीलनकर्त्तरि स्त्रियां ङीप् ।

**आनृण्य** न० अनृणस्य भावः कर्म्म वा ष्यञ् । ऋणशून्यत्वे ऋणशोधने । "वक्तव्यं सर्वदा सद्भिरप्रियञ्चापि यद्धितम् । आनृण्यमेतत् स्नेहस्य सद्भिरेव कृतं पुरा" नरसिंहपु० ।

**आनृशंसि** पुंस्त्री० अनृशंसस्यापत्यम् इञ् । दयालोरपत्ये गहा० भवादौ छ । आनृशंसीयः तद्भवादौ त्रि० ।

**आनृशंस्य** न० अनृशंसस्य भावः कर्म्म वा ष्यञ् । १अनिष्ठुरतायां २कारुण्ये "आरोढुं सुमहाप्राज्ञ आनृशंस्याच्छुना विना" भा०आश्व० २अ० । "आनृशंस्यात् ब्राह्मणस्य भुञ्जते हीतरे जनाः" मनुः । ३अनुकम्पायाञ्च । "अर्हणं तत्कुमारीणामानृशंस्यं हि केवलम्" उद्वा०त० स्मृतिः । "आनृशंस्यमनुकम्पा" रघु० । स्वार्थे ष्यञ् २कारुण्ययुक्ते त्रि० "एष धर्म्मपरोनित्यमानृशंस्यश्च पाण्डवः" भा०व०प०७१ अ० ।

**आनेतृ** त्रि० आ+नी—तृच् । आनयनकर्त्तरि स्त्रियां ङीप् ।

**आनेय** त्रि० आ+नी—कर्म्मणि यत् । देशाद्देशान्तरमानेतव्ये १घटादौ वैश्यकुलात् विप्रतोभ्राष्ट्राद्वा आनेतुं योग्ये २दक्षिणाग्नौ पु० आनाय्यशब्दे विवृतिः "आनेयो घटादि वैश्यकुलादेरानेयोदक्षिणाग्निश्च" सि०कौ० ।

**आ(अ)नैपुण** न० अनिपुणस्य भावः अण् उत्तरपदवृद्धिः पूर्व्वपदस्य वा । अपाटवे नैपुण्याभावे ष्यञ् । पूर्ववत् वृद्धिः आ(अ)नैपुण्यमप्यत्र ।

**आ(अ)नैश्वर्य्य** न० अनीश्वरस्य भावः ष्यञ् । उत्तरपदवृद्धिः पूर्व्वस्य पदस्य वा । १ऐश्वर्य्याभावे २ऐश्वर्य्यविरोधिनि सांख्यादिमतसिद्धे बुद्धेर्धर्मभेदे धर्म्माधर्म्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्यरूपा अष्टौ बुद्धेर्धर्मास्ते च भावरूपा एव तैरभावानङ्गीकारात् तत्र ज्ञानभिन्नानां सप्तानां बन्धहेतुत्वम् ज्ञानेन मोक्ष इति तेषां सिद्धान्तः यथाह सांका०कौमुद्योः" "रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः । सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण" तत्त्वज्ञानवर्जं बध्नाति धर्मादिभिः सप्तभिः रूपैरिति पुरुषार्थं प्रति भोगापवर्गौ प्रति आत्मनात्मानमेकरूपेण तत्त्वज्ञानेन विवेककख्यात्या विमोचयति पुनर्भोगापवर्गौ न करोतीत्यर्थः" ।

**आन्त** त्रि० अम+क्त नि०वा इडभावः उपधादीर्घः । पीड़िते इटपक्षे अमितोऽप्यत्र । [नान्तरोधर्म्मः सत्वम्" सा०द०

**आन्तर** त्रि० अन्तर्मध्ये भवः अण् । आभ्यन्तरे । "कस-